CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 785

Title Śatacaṇḍīvidhāna

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 785 Subject : Tantric Rit.

Title : Śatacaṇḍīvidhāna

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 8.8" by 4.4" Extent : 12 foll

Language : Sanskrit. Script : Devanāgarī

Remarks : ~~bee~~ Ends abruptly.

॥श्रीगणेशाय नमः॥ अथात्र शतचंडीविधानं॥ तत्र कर्त्ता
तीर्थक्षेत्रादौ शुभे देशे वा मंडपं चिकीर्षुर्गणपतिकूर्मानंतवसु
उण धानां स्वस्वनाममंत्रेण पूजनं विधाय॥ शतचंड्यां षोडशहस्तं सह
स्रचंड्यां विंशतिहस्तं मंडपं॥ रामवाजपेयोक्तप्रकारेण प्रसा
ध्य॥ मंडपाग्नेयं स्तंभवटे वा पूर्वोक्तदेवतानां पूजां कृत्वा॥ ताम्र
पात्रे गंधाक्षतकुसुमयुतमर्घ्यमादाय॥ जानुभ्यां पवनीं गत्वा॥

आगच्छसर्वकल्याणिवसुधेलोकधारिति॥उद्धृतासिवराहेणसशै
लवनकानना॥मंडपंकारयाम्यद्यत्वदूर्ध्वंशुभलक्षणं॥गृहा
३ दा णार्घ्यंमयादत्तंप्रसन्नाशुभभवेति॥भूम्यै॥अर्घ्यंदत्वा॥मंडपंवि
धायतदीशान्यांग्रहवेदींद्व्यंगुलवप्रांनैरृत्यवाकोणेवास्तुपीठ १
वेदींवितस्तिमात्रोच्चांसमततोहस्तमात्रायतांकृत्वाचतथैवाग्नेय्यां
गणपतिवेदींचनिर्मायमंडपमध्ये॥एवंगोविंदभट्टपद्धतौ॥बौद्धायनमतेउ

कुंडभास्करे॥ग्रहस्येशानदीग्भागेपीठंरुहस्तप्रमाणतः॥वप्रद्वयवृतां
वेदिंवितस्त्युच्छ्रयसंयुतां॥संस्थापनायदेवानांचतुरस्रामुदक्प्लवां॥द्विरं
गुलोच्छ्रितोवप्रःप्रथमःसमुदाहृतः॥त्र्यंगुलोच्छ्रायसंयुक्तंवप्रद्वयमथोपरि॥
द्व्यंगुलस्तत्रविज्ञेयंसर्वेषांकथितोबुधैः॥ग्रहवेदिंवप्रद्वययुक्तांविधाय
तत्रप्रथमोवप्रःद्व्यंगुलोच्छ्रितस्तदुपरिद्वितीयोवप्रःस्त्र्यंगुलोच्छ्रितउभौ
द्व्यंगुलविस्तारौवप्रद्वयोपरिसप्तांगुलोच्छ्रितांहस्तविस्तृतेत्यादिलक्षणल
लक्षितां॥

पक्केष्टकचितांरम्यांमुछ्रायेहस्तसम्मितां ॥ वसुकोणमितांवेदींमध्ये कु
र्यात्त्रिभागतः ॥ सर्वलक्षणसंपन्नांवेदींकुर्यान्मनोहरां ॥ पंचवर्णवि
तानंचकिंकिणीजालमंडितं ॥ मंडपमध्ये ॥ यथा ॥ मध्यस्तंभचतुष्ट
यस्यमध्येचतुरस्रंकृत्वा ॥ षोडशहस्तमंडपेष्टादशांगुलाधिकहस्तेनको २
णेषूभयतोंकयित्वाष्टसूत्रदानादष्टास्त्रिवेदीरिति ॥ राघवभट्टोक्तप्रकारः ॥
यद्वाषोडशांगुलाधिकहस्तमात्रंकृत्वा ॥ मध्येचतुरस्रंकृत्वा ॥ तत्संलग्नानि
तन्मानानिचतुर्दिक्षुचत्वारिचतुरस्राणिविधाय बाह्यसूत्राणांकोणेष्वक्षणया

सूत्राणिदत्वा ॥ दिक्षुचतु~~स्रा~~रश्चतुर्थांशांस्त्यजेदित्यष्टास्त्रिवेदी ॥ साचसर्व
कोणेषुहस्तोच्चां ॥ यद्वावाजपेयोक्तांवावेदींविधायतस्यांवारुणंमंडलंसर्वतोभद्रं
वाविरच्योपरिकिंकिणीचामरादियुक्तवितानंबंधयेत् ॥ एवंगोविंदभट्टपद्धतौ ॥
अथदानमयुखोक्तवारुणमंडलउद्धार ॥ अथषोडशारचक्र ॥ तत्रगुरुर्वेद्यांमध्ये
त्रिहस्तव्यासंचतुरस्रंप्रसाध्यप्रागपरदक्षिणोत्तरनवनवंरेखाभिस्तच्चमुंतुषष्ठि
कोष्टकंकुर्यात् तत्रकोष्टानिप्रत्येकंनवांगुलानिसंपद्यंते ॥ ततोबहिरंत्यपक्ति

पुष्पार्घ्ययो चतुर्दिक्षु मध्यकोष्ठानि चत्वारि मार्जयित्वा। तदुपर्युपान्त्यपङ्क्ति
पुष्पार्घ्ययोस्तत्रयत्रयं त्यक्त्वा। प्रतिदिशं मध्यकोष्ठद्वयं द्वयं मार्जयेत्। तेन चतुर्दि
क्षुद्वे मध्यकोष्ठानि चत्वारि द्वारांगि सिध्यंति। ततो मध्यस्थितषोडशकोष्ठानि मार्जयेत्। ततो बाह्येऽके कं कोणकोष्ठकं विहाय। कोणकोष्ठद्वा
रपीठांतरालवर्त्तिन्यवशिष्टानि पंचपंचकोष्ठानि मार्जयेत्। तदा मध्य
चतुरस्रपीठपादाः सिध्यंति। ततो मध्याच्चत्वारि वृत्तानि कुर्यात्।।

तत्राद्ये चत्वार्यंगुलानि व्यासः। द्वितीये ष्टौ तृतीये चतुर्विंशतिः। चतुर्थे षड्विंश
तिरिति। तच्चतुरंगुलं वृत्तं कर्णिकारूपं पीतेन रजसा पूरयित्वा। वर्णिकावधि
रेखां सितेन रजसा निर्माय। तद्बहिरष्टांगुलात्मके वृत्ते पीतरक्तसितरजोभिः
संपादितान् मूलमध्याग्रालिषोडशकेशरकेसरालिसंपाद्य। तत्केसरावधिरे
खां सितेनैव रजसांगुलेन संपाद्य ~~तत्के~~ चतुर्विंशांगुलात्मके तद्बहिर्वृ
त्ते सितरजसा। अष्टदिक्ष्वष्टेषु पत्रालिरक्ताग्रालिं कुर्यात्। ततोऽवांतरेरे

खांसितेनरजसाविधायदलांतराणिकृष्णेनरजसापूरयित्वा॥ तद्बहिरेकांगु
लांतरां॥ बहिर्वृत्तरेखांसितेनैवरजसासंपाद्य॥ वृत्तद्वयांतरांपरितोष्टदलाग्र
तःसंधिचिह्नैःषोडशधाराविभज्य प्रतिभागयवाकारान्षोडशारान्॥ श्या
मपीतारुणःश्वेतरजोभिःकल्पयित्वा॥ तदंतरायथायोगरजोभिःपूरयित्वा॥ ४
तद्बहिःसितपीतारुणश्यामहरिताःपंचरेखालिखेत्॥ तद्बहिःपीठक्षेत्रंचतुरस्रं
यथाशोभंरजोभिरलंकृत्य॥ पीतावधिरेखासितेनरजसाचतुरस्रांरचयत्॥

द्वारक्षेत्राणिपूर्वादितःपीतश्यामश्वेतहरितरजोभिःपूरयेत्॥ आग्नेयादिकोणं
कोष्टचतुष्टयं॥ लोहितहरितश्यामधवलैःपूरयेत्॥ आग्नेयादिपीठपादचतु
ष्टयंपंचकोष्टात्मकंक्रमात्सितरक्तपीतकृष्णरजोभिःपूरयेत्॥ ततःसि
तेनरजसांगुलोन्नतेनबहिश्चतुरस्रांरेखांकुर्यादितिपितामह
चरणाः॥ मदनाद्याश्च॥ ठक्करमतेचतुर्हस्तीचतुरस्रं॥ तत्रप्रत्येकं
द्वादशांगुलानिकोष्टानि॥ वृत्तानितुपंच॥ तत्रद्येवृत्तेचत्वार्यंगुला

निव्यासः॥ द्वितीयेष्टौ॥ तृतीये विंशति॥ चतुर्थे चतुर्विंशति॥ पंचमेष्टत्रिंश
दिति॥ पंचकोष्टात्मकं पीठपादचतुष्टयं॥ आग्नेयादिक्रमेण रक्तहरित
श्यामसितैः पूरणीयं॥ कोणकोष्टचतुष्टयं प्रत्येकं त्रिभिस्त्रिभिर्वर्णै
रिति विशेषः॥ इति षोडशारचक्रविधिः॥ तथा॥ वज्रं प्रागुत्तमे भागे आ ५
ग्नेयां शक्तिमुज्वलां॥ आलिखेद्दक्षिणे दंडं नैर्ऋत्यां खड्गमालिखेत्
पाशं तु वरुणे लेख्यं ध्वजं वै वायुगोचरे॥ कौबेर्यां तु गदालेख्यं ईशान्यां

मंडपपश्चिमे भागे शतचंड्यां द्विहस्तं सहस्रचंड्यां चतुर्हस्तं षट्हस्तं चतुरस्रं
कुंडं पद्मकुंडवा कुर्यात्॥ एवं गोविंदभटपद्धतौ॥ अथ कुंडतत्वप्रदीपे पद्मकुंड॥
जिनांशवेदाश्रिणि सूत्रकेंतर्वस्वंशकव्यासदलेन वृत्तं॥ साकर्णिका स्याद्वि
गुणेन तद्वत्स्युकेसरास्तत्त्रिगुणेन मध्यं॥१॥ स्यादूर्द्ध्वं भूरब्धिगुणेन त १२
तद्वत्पूर्णेंदुचंद्राब्धिरसोनितेन॥०११४६॥ वृत्तं तथा पंचगुणेन १४।६।६।३।२।
कुर्याद्धित्वा भुवोर्द्ध्वं रचयेद्दलानि॥२॥ वेदाश्वि २।४। विष्कुंभमितेथ वृत्तेन कवैपक्ष

र्तुभिरंगुलाद्यैः॥९॥१॥२॥४॥ज्याभ्यः शरा॥ज्यासूत्रकान्यष्टमितानि दद्यात्
पुर्णाद्रिदृग्वेदकसायकानि॥०॥७॥२॥४॥ज्याभ्यः शराश्चोत्तममंडलां
तं वह्न्यर्तुखाद्रीक्षणसंमितास्युः॥३॥६॥०॥७॥२॥शराभितस्याद्यशिरामषड्
भूरसांगुलाद्यैः॥१॥३॥६॥१॥६॥शरयुग्ममन्यत्॥४॥व्योमर्तुवेदाग्निरसै
॥०॥६॥४॥३॥६॥पुनश्च शरद्वयं चोभयतस्तयोः स्यात्॥जीवांघ्रिवव्या
सदलेन वृत्तं पादद्वयं चोभयसायकांतं॥५॥महीगुणत्विंदुमितेन वृत्ते॥१॥३॥
६॥१॥पादद्वयं मध्यशराग्रतश्च॥तयोरधस्ताग्रयुगं च वृत्तपादाग्रयोर्नि

म्नगयोस्तु योज्यं॥६॥त्यक्तोर्द्ध्ववृत्तांघ्रिभुवं तु मध्यं भवेच्च पद्मे दलमुत्तमं तत्॥
तथैव जह्याद्धनुषः फलं तच्छेषं भवेदर्द्धभुवः प्रमाणं॥७॥पद्मे दलानामखि
लं फलं स्यात्क्षेत्रार्द्धहानिस्त्वखिलाप्यनेन॥स्वव्यासकोत्सेधककर्णिकी
हित्यक्त्वा खनेत्केसरकान्प्रकुर्वन्॥८॥एवं दलान्यष्टमितानि चित्वाद
लानि चत्वार्यथवोत्तमानि॥अस्मत्कृतेनातिमहच्छ्रमेण तुष्यंतु ये क्षेत्रविदो
बुधास्ते॥९॥ ॥अस्यार्थः॥ ॥अस्मिन्क्षेत्रे चतुर्विंशत्यंगुलपरिमितं
चतुरस्रं कृत्वा॥पूर्वापरदक्षिणोत्तरमध्यसूत्रद्वयेन मध्यं कल्पयित्वा आ

आयामसूत्राष्टमभागेनत्र्यंशपरिमितेनसूत्रेण कर्कटेनवावृत्तंरचयेत्
साकर्णिकास्यात्॥पुनरष्टमांशद्वितयेनषडंगुलपरिमितेनद्वितीयंवृ
त्तंकुर्यात्॥तस्मिन्केसराणिरचयेत्॥ततस्त्रिभिरष्टमांशैर्नवांगुले
नकर्कटेनतृतीयंवृत्तंकुर्यात्॥तत्रदलानांमध्यभूर्भवेत्॥पु श्चतुर्भि ९
रष्टमांशैर्द्वादशांगुलरूपैरुपरिभूमिः॥सात्क्षत्रपरिमिताभवति॥
ततःपूर्णेंदुचंद्राब्धिरसोनितेन॥०।१।१।४।६॥अष्टमांशपंचकेनचतुर्द

शांगुल॥१४॥षट्यव॥६॥षट्युका॥६॥स्तिस्रोलिख्या॥३॥वालाग्रद्वय
॥२॥परिमितेनकर्कटेनपंचमंवृत्तंकुर्यात्॥तस्मिन्अष्टौसूत्राणिपूर्वा
परदक्षिणोत्तरआग्नेयवायव्यईशानैर्ऋतीदिक्षुदत्वाचतुर्थेवृत्ते॥द्वि
द्विनंदेषुवेदैश्च॥४॥५॥९॥२॥२॥वृत्तव्यासेसमाहते॥खखखाभ्रार्क॥१२॥
।०।०।०।०॥संभक्तेलभ्यंतेक्रमशोभुजाइत्यष्टभुजानानीय अथवाचतुर्विं
शत्यंशायतमंडलेईशानकोणान्मध्यकर्णिकामध्यकेंद्रमितंमध्यसूत्रे

तत्केंद्रात्पूर्वोत्तरदिक्सूत्रद्वये चतुरस्रं कुर्यात्॥ तस्य कर्णवशात् क्षे
त्रफलानयनं चतुरस्रं स्याक्षणयोरजुर्द्विगुणीत्यनेन द्विगुणक्षत्रफ
लमानीयाद्धीकृत्य मूलानयनं॥ तन्मूलमष्टावंगुनित्रयोयवायुका
षट्कमेकलिख्यात्मक॥८॥३॥६॥१॥ भुजचतुष्टयं भवति॥ आयामसूत्रे दक्षि
णभुजे प्राच्यां त्रीण्यंगुलानि चत्वारो यवाः एकायुका सप्तलीख्याः परिशि
ष्यंते॥३॥४॥१॥७॥ सा कोटिः॥ पूर्वोत्तरं चतुरस्रभुजसूत्रं बाहुः॥ ॥८॥३॥६॥
॥१॥ तत्कृत्यो योगपदं कर्ण इत्यनेन कर्णमानीय तत्कर्णमानीं नपूर्वस्मिन्

वृत्तक्षेत्रे अष्टदिक्षु सूत्रेषु अष्टभुजानयन॥ स च नवांगुलैकयवयुका
द्वयषट्लिख्यापरिमितो भवति॥८॥१॥२॥६॥ एवमष्टौ भुजाख्यान्ज्या
सूत्रान्पातयित्वाऽष्टौ धनुषि निष्पादयेत्॥ तानि च दिग्विदिक्सूत्र
मध्यमभागेऽष्टौ सूत्राणि पातयित्वा॥ तत्सूत्रद्वयस्याग्रद्वयपरिमितां
नि धनूंषि भवंति॥ तत्रैकस्य धनुषो ज्यार्द्धं चतुरंगुलानि चत्वारो य
वाः पंचयुका लिख्याद्वयं॥४॥४॥५॥२॥ इयं कोटिदिग्विदिक्सूत्रयोर्मध्य
सूत्रं कर्णद्वादशांगुलः कोटिश्रुतिकृत्योरंतरात्पदं बाहुरिति॥ क्षेत्र

मध्यसूत्रे धनुर्ज्यायाः पश्चिमदिशि एकादशांगुलानि पूर्णयवपंचयुकाश्च
तस्रो लिख्या बाहुः ॥११॥०॥५॥४॥ तदुपरिभागे पूर्णांगुलसप्तयवाद्वियुके च
स्रो लिख्या ॥०॥७॥२॥४॥ परिशिष्यंते ॥ स एव धनुषि शरो भवति ॥ ए
तस्य धनुषः फलं ॥ जीवाशरैक्यदलहतशरस्य वर्गं दशाहतं नवभिर्वि १०
भजेदवाप्तफलं प्रजायते कार्मुकस्य फलं इत्यनेन चतुरंलांनि षड्य
वाः धनुषफलं ॥४॥६॥ तस्मिन्चतुर्थवृत्तक्षेत्रफलं व्यारसार्द्धवर्गवर्ग
त्यनेनानीय ॥ तच्चतुःशतिपंचपंचाशदधिकाक्षेत्रफलं ॥४॥५५॥ शे

षमेकविंशाधिकशतांगुलानि ॥१॥२॥१॥ दलाष्टके साध्यानि ॥ प्रतिदलं पंच
दशांगुलान्येकोयतो यथा क्षेत्रफमायाति तथैव कार्यं ॥ तत्र उत्तमवृत्तविस्ता
रः ॥ ॥२॥६॥६॥३॥२॥ धनुःशराः ॥७२४॥ तेन ज्यासूत्रमध्यादुत्तमवृत्तसूत्र
पर्यंतं दीर्घाशरास्त्रीण्यंगुलानि षड्यवाः पूर्णयुकाः सप्तलिख्या वालाग्रद्वय
परिमितास्युः ॥३॥६॥०॥७॥२॥ तेषां दीर्घशरणावभितः शशिरामषड्भूरसांगु
लानि अंतरं मुक्ताशरद्वयं ॥३॥१॥३॥६॥१॥६॥ ज्याभ्यः प्रथक्प्रथक् कार्यं ॥ तयो
र्मध्ये दक्षिणशरात्दक्षिणतः उत्तरशरादुत्तरतश्च ॥ एवं व्योमर्तुवेदाग्निरसां

तराले ॥०।६॥४॥३॥६॥ पुनः शरद्वयं कुर्यात् ॥ एवं शरपंचकं पंचकं निर्माय जीवा
ग्रान् जीवाच र्थांश ।२।२।२।५।४॥ व्यासदलेन दक्षिणोत्तरशरादधिवृत्तपाद
द्वयं ऊर्द्ध्वमुखं रचयित्वा मध्यशराग्रात् दक्षिणोत्तरशरावधिमहिगुणर्त्विंदुमितेन
॥१।३।६।६।१॥ व्यासदलेनाधोमुखं वृत्तपादद्वयं विषदध्यात् अधरोत्तरवृत्तपादाग्रद्व ११
यं संमलयेदूर्द्ध्वमुखं रचयीत्वा वृत्तांघ्रिभुवं त्यजेदेवमन्युनानतिरिक्तान्यष्टौ पद्मद
लानि निष्पद्यंते ॥ एवमष्टौ दलानि ॥ वक्ष्यमाणप्रकारेण वा चतुर्दलानि मित्वा मध्यं
वृत्तं स्वव्यासपरिमितं षडंशमुच्चं त्यक्त्वा द्वितीयवृत्ते षोडशकेसरचिह्नानि कृत्वा

परितः खनेत् ॥ अत्र कृष्णमेखलाद्यंगानि तदाकृतिरूपाणि कुर्यात् ॥ अत्र क्षेत्रफलो
पपत्तिस्तु ॥ जीवाग्रनिर्मितवृत्तपादद्वये जीवातुरीयांशं प्रकल्प्य वृत्तपादद्वयमेकी
भूतं ज्ञात्वा सार्द्धवर्गवर्गाक्षेत्रफलं ॥ दशगुणान्मूलमित्यनेन फलानयनं ॥ ज्यातु
रीयांशं व्यासदलं ॥२।२।५॥४॥ तत्फलं ॥१।४॥ मंडलार्द्धत्वादधीकृतं ॥९॥२॥
वृत्तपादद्वयस्य फलं ॥ तयोर्मध्यचतुरस्रभुजो जीवार्द्धः प्रमाणः ॥४॥४॥५॥३॥ जीवा
तुरीयांशं कोटिः ॥ भुजकोटिघाते कृते यवचतुष्टयाधिकदशांगुलानि ॥१०॥४॥ क्षे
त्रफलं ॥ उपरि चतुरस्रे महीगुणर्त्विंदुमित ॥१॥३॥६॥१॥ कोटिके तद्द्विगुणभुजे

॥२॥७॥४॥१॥ भुजकोटिघातकृते क्षेत्रफलं ॥४॥२॥ उपरि वृत्तपादद्वयस्य एकीकृ
ते ॥१॥३॥६॥१॥ एतत्परिमितव्यासार्द्धवर्गतिकृते क्षेत्रफलं ॥३॥१॥ इदमुपरि चतुर
स्रफलादपसारिते शेषमेकांगुलमेकोयवश्च ॥१॥१॥ एवमधोवृत्तपादद्वये
क्षेत्रफलं ॥८॥२॥ मध्यचतुरस्रस्य फलं ॥१०४॥ उपरिदलाग्रफलं ॥१॥१॥ १२
मिलितं ॥१९॥७॥ एकोनविंशत्यंगुलानि सप्तयवाः समुदितं फलं ॥ तस्मा
दधोधनुःफले अपसारिते ॥४॥६॥ शेषं ॥१५॥१॥ पंचदशांगुलान्येकोयवः प्रति
दलं फलं एवमष्टानां दलानां फलं ॥१२१॥ एवं चतुर्थवृत्ते ॥४५५॥ पंचमवृत्तस्य